## पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः । (६७/३९७४)

पूजनेभ्यः काष्ठादिभ्यः [1]उत्तरपदं पूजितमनुदात्तं भवति । काष्ठ – [2]काष्ठाध्यापकः । [3]काष्ठाभिरूपकः[4] । दारुण – दारुणाध्यापकः । [5]दारुणाभिरूपकः । अमातापुत्र – अमातापुत्राध्यापकः[6] । अयुत – अयुताभिरूपकः । अयुताध्यापकः । अद्भुत – अद्भुताध्यापकः । अनुक्त – [7]अनुक्ताध्यापकः । भृश – भृशाध्यापकः । घोर – घोराध्यापकः । परम – परमाध्यापकः । सु – [8]स्वध्यापकः । अति – अत्यध्यापकः[9] ।

[८९७] मलोपश्च । (म. भा. ३.३७९)

इति वार्तिककारमतम् । मयूरव्यंसकादित्वात् समासः । समासे चैतदनुदात्तत्वम् । [10]समासान्तोदात्तत्वापवाद इष्यते । दारुणमध्यापकः इत्येवमादिषु न भवति । 'मलोपश्च' इत्यनेनाप्ययमेव[11] विषय आख्यायते, यत्र विभक्तेरभावात् मकारो न श्रूयते तत्रानुदात्तत्वम् इति । असमासे हि मलोपो नैवेष्यते । दारुणम[12]धीते दारुणमध्यायकः इति ।

पूजनात् इत्येव पूजितपरिग्रहे सिद्धे पूजितग्रहणमनन्तरपूजितप्रतिपत्त्यर्थम् । एतदेव[13] ज्ञापकमिह प्रकरणे पञ्चमीनिर्देशेऽपि नानन्तर्यमाश्रीयते इति । तथा च 'यद्वृत्तान् नित्यम्' (८.१.६६/३९७३) इत्यत्र उदाहृतम् । [14]अनुदात्तमिति वर्तमाने पुनरनुदात्तग्रहणं प्रतिषेधनिवृत्त्यर्थम्[15] ॥

## सगतिरपि तिङ् । (६८/३९७५)

[16]सगतिरगतिरपि पूजनेभ्यः काष्ठादिभ्यः [17]परं पूजितं तिङन्तमनुदात्तम् भवति । [18]यत्काष्ठं पचति । यत्काष्ठं प्रपचति । यद्दारुणं पचति । [19]यद् दारुणं प्रपचति । 'तिङ्ङतिङः' । (८.१.२८/३९३५) इति निघातस्य, निपातैर्यद्यदिहन्त (८.१.३०/३९३७) इति [20]प्रतिषेधे प्राप्ते [21]पुनर्विधानम् । सगतिग्रहणाच्च गतिरपि [22]निहन्यते । गतिग्रहणे चात्र उपसर्गग्रहणमिष्यते । इह न भवति, यत् काष्ठं शुक्लीकरोति । यत् काष्ठं कृष्णीकरोति ॥

## कुत्सने च सुप्यगोत्रादौ । (६९/३९७६)

पदात् इति निवृत्तम् । [23]सगतिरपि तिङ इति वर्तते । कुत्सने च सुबन्ते गोत्रादिवर्जिते परतः सगतिरपि तिङ अगतिरपि अनुदात्तो भवति । पचति पूति । प्रपचति पूति । पचति मिथ्या । [24]प्रपचति मिथ्या । कुत्सने इति किम् ? पचति शोभनम्[25] । सुपि इति किम् ? पचति क्लिश्नाति । अगोत्रादौ इति किम् ? पचति गोत्रम् । पचति ब्रुवम् । पचति प्रवचनम् ।

[८९८] क्रियाकुत्सन इति वक्तव्यम् । (म.भा. ३.३८०)

कर्तुः कुत्सने मा भूत्, पचति पूतिर्देवदत्तः । प्रपचति पूतिः ।

[८९९] पूतिश्चानुबन्धो भवतीति वक्तव्यम् । (म.भा. ३.३८०)

तेनायं चकारानुबन्धकत्वादन्तोदात्तो भवति ।

---

1. उत्तरं ह. 2. काष्ठाध्यायकः ह. 3. काष्ठाभिरूपकः नास्ति ड. 4. स्वाध्यायकः इत्यधिकम् ह. 5. नास्ति ड. 6. अनुज्ञात–अनुज्ञाताध्यापकः इत्यधिकम् ब.क, अनुज्ञाताभिरूपकः इत्यधिकम् क. 7. अनुक्ताध्यापकः नास्ति ड. 8. स्वाध्यापकः इ. 9. कल्याण - कल्याणाध्यापकः, वेश-वेशाध्यापकः इत्यधिकम् ब.ड.इ, सुभगवचनो वेशशब्दः इत्यधिकम् ह.ड. 10. समासान्तो – तत्रानुदात्तत्वम् नास्ति ह. 11. समासविषयः क. 12. अचति ब.क.ड.इ.ह. 13. वचनं इत्यधिकम् ड.इ. 14. अनुदात्तग्रहणम् ब, अनुदात्तमिति वर्तमानम् इ. 15. काष्ठ दारुण अमातापुत्र वेश अनाज्ञात अनुज्ञात अयुक्त अयुत अद्भुत अनुक्त भृश घोर सुख परम सु अति अभि इति काष्ठादिः इत्यधिकम् ड.ह. 16 पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः इति वर्तते इत्यधिकम् क. इ. ड. 17. परः पूजितः अनुदात्तो भवति ब. क.ड. 18. यत् काष्ठा पचति, यत्काष्ठा प्रपचति ब. 19. यत् नास्ति इ. 20. निषेधे इ. 21. अयमारम्भः ह. 22. हन्यते इ. 23. वाक्यमिदं नास्ति ब. इ. ह. 24. उदाहरणमिदं नास्ति क. 25. प्रपचति शोभनम् इत्यधिकम् ब.क.इ.